# श्री शंकरमठम् संस्कृत श्लोक पठण स्पर्धा (2024)

**Std 5th, 6th and 7th**

## ॥ श्रीकृष्णाष्टकम् ॥

भजे व्रजैकमण्डनं समस्तपापखण्डनं

स्वभक्तचित्तरञ्जनं सदैव नंदनंदनम् ।

सुपिच्छगुच्छमस्तकं सुनादवेणुहस्तकं

अनङ्गरङ्गसागरं नमामि कृष्णनागरम् ।। १ ।।

मनोजगर्वमोचनं विशाललोललोचनं

विधूतगोपशोचनं नमामि पदमलोचनम् ।

करारविंदभूधरं स्मितावलोकसुंदरं

महेन्द्रमानदारणं नमामि कृष्णवारणम् ।। २ ।।

कदम्बसूनकुण्डलं सुचारूगण्डमण्डलं

व्रजाङ्ङ्गनैकवल्लभं नमामि कृष्णदुर्लभम् ।

यशोदया समोदया सगोपया सनन्दया

युतं सुखैकदायकं नमामि गोपनायकम् ।। ३ ।।

सदैव पादपङ्कजं मदीयमानसे निजं

दधानमुत्तमालकं नमामि नंदबालकम् ।

समस्तदोषशोषणं समस्तलोकपोषणं

समस्तगोपमानसं नमामि नंदलालसम् ।। ४ ।।

भुवो भरावतारकं भवाब्धिकर्णधारकं

यशोमतीकिशोरकं नमामि वित्तचोरकम् ।

दृगन्तकान्तभङ्गिनं सदासदालसङ्गिनं

दिने दिने नवं नवं नमामि नन्दसंभवम् ।। ५ ।।

गुणाकरं सुखाकरं कृपाकरं कृपापरं
सुरद्विषन्निकन्दनं नमामि गोपनंदनम् ।
नवीनगोपनागरं नवीनकेलिलंपटं
नमामि मेघसुंदर तडित्प्रभालसत्पटम् ।। ६ ।।
समस्तगोपनन्दनं हृदम्बुजैकमोदनं
नमामि कुञ्जमध्यगं प्रसन्नभानुशोभनम् ।
निकामकामदायकं दृगन्तचारूसायकं
रसालवेणुगायकं नमामि कुञ्जनायकम् ।। ७ ।।
विदग्धगोपिकामनोमनोज्ञतल्पशायिनं
नमामि कुञ्जकानने प्रवृध्दवनिपायिनम् ।
यदा तदा यथा तथा तथैव कृष्णसत्कथा
मयां सदैव गीयतां तथा कृपा विधीयताम् ।
प्रमाणिकाष्टकद्वयं जपत्यधीत्य यःपुमान
भवेत्स नन्दनन्दने भवे भवे सुभक्तिमान् ।। ८ ।।
।। इति श्रीमत् शंकराचार्यविरचितं श्रीकृष्णाष्टकम् संपूर्णम् ।।